कृत्वा च वैष्णवं सम्यक् चरुं गोक्षीरसंयुतम् ॥
शिष्यावाह्निप्रमाणां वै धारामाज्यस्य पातयेत् ॥
जलकुम्भान् महावीर ! स्थापयित्वा त्रयोदश ।
भक्ष्यैर्नानाविधैर्युक्तान् सितवस्त्रैरलङ्कृतान् ।
युतानौडुम्बरैः पात्रैः पञ्चरत्नसमन्वितान् ॥
चतुर्भिर्बह्वृचैर्होमस्तत्र कार्य्य उदङ्मुखैः ।
रुद्रजापश्चतुर्भिश्च यजुर्वेदपरायणैः ॥
वैष्णवानि च सामानि चतुरः सामवेदिनः ।
अरिष्टवर्गसहितान्यभितः परिपाठयेत् ॥
एवं द्वादश तान् विप्रान् वस्त्रमाल्यानुलेपनैः ।
पूजयेदङ्गुलीयैश्च कटकैर्हेमसूत्रकैः ॥
वासोभिः शयनीयैश्च वित्तशाठ्यविवर्जितः ।
एवं क्षपातिवाह्या वै गीतमङ्गलनिस्वनैः ।
उपाध्यायस्य च पुनर्द्विगुणं सर्व्वमेव तु ॥ * ॥
ततः प्रभाते विमले समुत्थाय त्रयोदश ।
गा वै दद्यात् कुरुश्रेष्ठ ! सौवर्णमुखसंयुताः ॥
पयस्विनीः शीलवतीः कांस्यदोहनसंयुताः ।
रौप्यखुराः सवस्त्राश्च चन्दनेनाभिचर्च्चिताः ॥
तांस्तु तेषां ततो भक्त्या भक्ष्यभोज्येन तर्पितान् ।
कृत्वाथ ब्राह्मणान् सर्व्वानन्नैर्नानाविधैस्तथा ॥
भुक्त्वा चाक्षारलवणमात्मना च विसर्जयेत् ॥
अनुगम्य पदान्यष्टौ पुत्त्रभार्य्यासमन्वितः ।
प्रीयतामत्र देवेशः केशवः क्लेशनाशनः ॥
शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः ।
यथान्तरं न पश्यामि तथा मे स्वस्ति चायुषः ॥
एवमुच्चार्य्य तान् कुम्भान् गाश्चैव शयनानि च ।
वासांसि चैव सर्व्वेषां गृहाणि प्रापयेद्बुधः ॥
अभावे बहुशय्यानामेकामपि सुसंस्कृताम् ।
शय्यां दद्याद्गुरौ भीम ! सर्व्वोपस्करसंयुताम् ॥
इतिहासपुराणानि वाचयित्वातिवाहयेत् ।
तद्दिनं नरशार्दूल ! य इच्छेद्विपुलां श्रियम् ॥
तस्मात्त्वं सत्त्वमालम्ब्य भीमसेन ! विमत्सरः ।
कुरु व्रतमिदं सम्यक् स्नेहाद्गुह्यदाख्यमीरितम् ।
त्वया कृतमिदं वीर ! त्वन्नामाख्यं भविष्यति ।
सा भीमद्वादशी ह्येषा सर्व्वपापहरा शुभा ।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते ॥"
त्वमादिकर्त्ता भव शौकरेऽस्मिन्
कल्पे महावीरवरप्रधान ! ।
यस्याः स्मरणकीर्त्तनमप्यशेषं
विनष्टपापस्त्रिदशाधिपः स्यात् ॥
दृष्ट्वा च यामप्सरसामपीशा-
वेश्याकृतामप्यभवान्तरेषु ।
आभीरकन्येति कुतूहलेन
सेवोर्व्वशी संप्रति नाकपृष्ठे ॥
जातापि सा वैश्यकुलोद्भवापि
पुलोमकन्या पुरुहूतपत्नी ।
तत्रापि तस्याः परिचारिकेयं
मम प्रिया संप्रति सत्यभामा ॥
स्नातः पुरा मण्डलमेष तद्व-
त्तेजोमयं देवशरीरमाप ।
अस्याश्च कल्याणतिथौ विवस्वान्
सहस्रधारेण सहस्ररश्मिः ॥
इदमेव कृतं महेन्द्रमुख्यै-
र्वसुभिश्चैव पुरा सुरादिभिश्च ।
फलमत्र न शक्यतेऽभिवक्तुं
यदि जिह्वाकोटयो मुखे स्युः ॥
कलिकल्मषविदारिणीमनन्ता-
मिति कथयिष्यति यादवेन्द्रसूनुः ।
अपि नरकगतान् पितॄनशेषा-
नलमुद्धर्त्तुमिहैव यः करोति ॥
य इदमनघं शृणोति चातिभक्त्या
परिपठतीह परोपकारहेतोः ।
तिथिमिह सकलार्थभाङ्नरेन्द्र-
स्तव चरणेन स शाश्वतामुपैति ॥
कल्याणिनी नाम पुरा बभूव
या द्वादशी माघदिनेऽभिपूज्या ।
सा पाण्डुपुत्त्रेण कृता भविष्य-
त्यनन्तपुण्यानघ ! भीमपूर्व्वा ॥"
इति मत्स्यपुराणे भविष्यद्व्रतोद्देशे भीमद्वादशी नाम ६५ अध्यायः ॥

भीरुः, त्रि, ( बिभेतीति । भी भये + "भियः क्रुक्लुकनौ ।" ३ । २ । १७४ । इति क्रुः ।) भयशीलः । (यथा, मनौ । ७ । ६२ ।
"तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥")
तत्पर्य्यायः । चकितः २ भीरुकः ३ भीलुकः ४ । इत्यमरः । ३ । १ । २६ ॥ भीलुः ५ । इति शब्दरत्नावली ॥

भीरुः, स्त्री, (बिभेतीति । भी + "भियः क्रुक्लुकनौ ।" ३ । २ । १७४ । इति क्रुः । ) भयशीला स्त्री । भयप्रकृतिका । इत्यमरभरतौ ॥ ( यथा, विष्णुपुराणे । १ । १५ । ३३ ।
"सत्यं भीरु ! वदस्येतत् परिहासोऽथवा शुभे ! ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥")
शतावरी । इति धरणिः, अमरश्च ॥ (यथा,—
"बहुपुत्त्री वरा भीरुः शतम्ली शतावरी ।
महापुरुषदन्ता च पीवरीन्दीवरी वरी ॥"
इति वैद्यकरत्नमालायाम् ॥)
कण्टकारी । इति शब्दचन्द्रिका ॥ शतपादिका । इति शब्दरत्नावली ॥ अजा । छाया । स्त्री । इति राजनिर्घण्टः ॥

भीरुः, पुं, ( बिभेतीति । भी + क्रुः । ) शृगालः । इति शब्दमाला ॥ व्याघ्रः । इति राजनिर्घण्टः ॥ इक्षुभेदः । इति रत्नमाला ॥ अस्य गुणाः । शैत्यकारित्वम् । स्वादुत्वम् । अविदाहित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

भीरुकं, क्ली, (भीरु + संज्ञायां कन् ।) वनम् । इति शब्दरत्नावली ॥

भीरुकः, पुं, ( भीरु + स्वार्थे संज्ञायां वा कन् । ) पेचकः । इति शब्दरत्नावली ॥ इक्षुभेदः । भोररी इति हिन्दीभाषा ॥ ( यथा, सुश्रुते सूत्रस्थाने । ४५ अध्याये ।
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥")
अस्य गुणाः । यथा, भावप्रकाशे ।
"वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुशीतो बृंहणो बल्यः पौण्ड्रको भीरुकस्तथा ॥"

भीरुकः, त्रि,( बिभेतीति । ञिभी भये + "भियः क्रुकन् ।" उणा० २ । ३१ । इति क्रुकन् । ) भययुक्तः । इत्यमरः ॥ कातरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भीरुपत्री, स्त्री,(भीरूणीव पत्राण्यस्याः । गौरादित्वात् ङीष् । ) शतमूली । इत्यमरः ।२।४।१०१॥

भीरुहृदयः, पुं, (भीरु हृदयमस्य । ) मृगः । इति जटाधरः ॥

भीरूः, स्त्री, ( भीरु + "ऊङुतः ।" ४ । १ । ६६ । इति ऊङ् । ) भयशीला नारी । इत्यमरटीकायां भरतः ॥

भीलभूषणा, स्त्री, ( भूषयतीति । भूष् + कर्त्तरि ल्युः । टाप् । भीलानां भूषणा । ) गुञ्जा । इति राजनिर्घण्टः ॥

भीलुः, त्रि, ( बिभेतीति । भी + क्लु । ) भीरुः । भयशीलः । इति शब्दरत्नावली ॥

भीलुकः, पुं, ( बिभेतीति । भी + "भियः क्रुक्लुकनौ । ३ । २ । १७४ । इति क्लुकन् । ) भीरुः । इत्यमरः । ३ । १ । २६ ॥ ( यथा, कथासरित्सागरे । ३२ । ५२ ।
"एतदेवानिमित्तं नः किमन्येनाद्यभीलुक ! ।
यत्त्वमस्माभिरानीतः काकशङ्की पदे पदे ॥")
भल्लुकः । इति शब्दरत्नावली ॥

भीषणः, पुं, ( भीषयते इति । भी + णिच् + "भियो हेतुभये षुक् ।" ७ । ३ । ४० । इति षुक् । भीषिधातुस्ततो नन्द्यादित्वात् ल्युः । ) भयानकरसः । इत्यमरटीकायां भरतः, मेदिनी च ॥ कुन्दुरुकः । कपोतः । हिन्तालः । इति राजनिर्घण्टः ॥ शिवः । इति शब्दरत्नावली । शल्लकी इति मेदिनी ॥ ( भयोत्पादने क्ली, । यथा, महाभारते । १५ । ७ । ४ ।
"व्यसनं भेदनञ्चैव शत्रूणां कारयेत्ततः ।
कर्षणं भीषणञ्चैव युद्धे चैव बलक्षयम् ॥")

भीषणः, त्रि, (भीषयते इति । भी + णिच् + ततो नन्द्यादित्वात् ल्युः । षुगागमश्च । ) गाढ़ः । दारुणः । इति मेदिनी । णे, ६८ ॥ ( यथा, रघौ । १२ । ४० ॥
"पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥")

भीष्मं, त्रि, ( बिभेत्यस्मादिति । भी + "भियः षुग् वा ।" उणा० । १ । १४७ । इति मक् । वा षुगागमश्च ।) भयानकम् । इत्यमरः ।१।७।२०॥ ( यथा, शतपथब्राह्मणे । ११ । ६ । १ । ३ ।
"सहोवाच भीष्मं वत भोः पुरुषान् वा ।"
"भीष्मं भयङ्करं ।" इति तद्भाष्ये महीधरः ॥)

भीष्मः, पुं, ( बिभेत्यस्मादिति । भी + मक् । षुग वेति पक्षे षुक् । ) भयानकरसः । इत्यमरटीकायां भरतः ॥ शिवः । राक्षसः । इति हेमचन्द्रः ॥ गाङ्गेयः । स च शान्तनुराज-